# Nrisimhanavaratna Stava

# નૃસિંહનવરત્નસ્તવઃ

## Document Information

Text title : Nrisimhanavaratna Stava

File name : nRRisiMhanavaratnastavaH.itx

Category : vishhnu, nava, dashAvatAra, shrIkRiShNalIlAshukamuni

Location : doc_vishhnu

Author : Shrikrishnalilashukamuni

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# નૃસિંહનવરત્નસ્તવઃ

શ્રીકૃષ્ણલીલા શુકમુનિ વિરચિતઃ ।
ઉગ્રં વીરમુદુન્મદિષ્ણુષુ મહાવિષ્ણું જ્વલન્તં જ્વલ-
દ્ગર્વં ગર્વિષુ સર્વતોમુખમસુધ્વંસ નૃસિંહં દ્રુહઃ
અગ્ર્યં ભીષણમદ્ભુતાદ્ભુતતમં ભદ્રં ભવધ્વંસિન (ભવધ્વંસનં)
મૃત્યું મૃત્યુષુ મૃત્યુમૃત્યુમમૃતં સોઽહં નમામ્યન્વહમ્ ॥ ૧॥ (તત્ત્વં મૃત્યુષુ)

કૌમોદક્યાં કુમાર્યાં કિમિહ બહુમતિર્નન્દકઃ કન્દુખાન-
ચક્રં ધિક્કારભૂમિર્જગતિ સુવિદિતા શ઼ૃઙ્ગવચ્છાર્ઙ્ગશક્તિઃ ।
શૂલં તૂલાસ્થિ પાશઃ પશુષુ વિષહતાં સૈવ વજ્રેઽપ્યવજ્ઞે-
ત્યુદ્રિક્તં દૈત્યમુચ્ચૈર્દહતિ નખમુખે ત્વાં નિદધ્યાન્નૃસિંહઃ ॥ ૨॥ (નિધત્તાન્નૃસિંહઃ)

માણિક્યસ્તમ્ભગર્ભે મુહુમુહુમુહિતિ પ્રાક્ક્ષણે પ્રેક્ષ્યમાણઃ (પ્રાઙ્ગણે)
પશ્ચાદેતત્પુરસ્તાદ્ ભુગુભુગુભુગિતિ સ્ફૂર્જિતૌર્જિત્ય વહ્નિઃ ।
પ્રારબ્ધક્રોધભારં ભુરભુરભુરિતિ ભ્રાન્તકાન્તિઃ પરસ્તાત્ (ભુરુભુરુભુરિતિ)
પશ્ચાન્નિશ્ચૂર્ણિતારિસ્ફુડુફુડુફુડિતિ ત્વાં નિદધ્યાન્નૃસિંહઃ ॥ ૩॥

નિર્ભિણ્ણસ્તમ્ભગર્ભાન્નભસિ પરિપતન્નુત્પતન્ નિષ્પતન્ દ્રાગ્
દૈત્યેન્દ્રોદ્રિક્તવક્ષસ્તટખનનનખઃ પ્રૌઢગાઢાટ્ટહાસઃ । (પ્રૌઢિગાઢાટ્ટહાસમ્)
તદ્રક્તોદ્રિક્તધારાધુરુધુરુધુરિતિ ધ્વાનનિર્ધૂતધૈર્યં
નિર્ઘુષ્ટોધ્દટ્ટનોદ્યદ્દ્રુતનટનસટસ્ત્વાં નિપિંષ્ટાન્નૃસિંહઃ ॥ ૪॥

ઉગ્રઃ ખડ્ગાગ્રકોટીખરનખરમુખક્ષુણ્ણદૈત્યેન્દ્રવક્ષઃ-
પીઠપ્રૌઢપ્રલોઠત્પૃથુલફાણિફણાભીષણસ્ફીતપાણિઃ ।
વીરક્રૂરપ્રભાવપ્રતિહાસિતજરત્કલ્પકલ્પાન્તરુદ્ર-
ક્રીડાવીળાર્હકેળીભ્રમિતભુવનદૃક્ ત્વાં નિકૃન્તાન્નૃસિંહઃ ॥ ૫॥

ઉ દ્ભ્રાભ્યદ્ભદ્રકાળીનિનદમુરુમહાભૈરવારાવગર્ભં
વિભ્રામ્યદ્વીરભદ્રદ્રુતગતિબહલોદ્રિક્તનૃત્તાન્તરુદ્રમ્ । (નૃત્તાદ્રિરુદ્રમ્)
પ્રભ્રાભ્યત્પાઞ્ચજન્યપ્રતિરવભરિતપ્રૌઢિમુદ્રાદ્રિકુઞ્જં

વિભ્રામ્યદ્ધીરસિંહધ્વનિધુતગગનં ત્વાં નિરુન્ધ્યાન્નૃસિંહઃ ॥ ૬॥

(અતઃ પરં અન્ય હસ્તલિખિતે પદ્યમિદમધિકતયા દૃશ્યતે-
ઘોરવ્યાઘૂર્ણવીરભ્રમિતતરતરત્તારકાદીપ્રદૃષ્ટિ-
    દંષ્ટાન્નિર્દષ્ટસૃક્વસ્થપુટમુખપુટાટપોવિભ્રાન્તજિહ્વઃ ।
નીરન્ધ્રધ્વાનધારાભરભરિતહરિદ્રન્ધ્રરુદ્ધાટ્ટહાસઃ
    સંહૃષ્ટભ્રૂસટોગ્રભ્રુકુટિભૃશપટુર્ભર્જતુ ત્વાં નૃસિંહઃ ॥

પુષ્ટોદ્ઘુષ્ટાટ્ટહાસસ્ફુટપટિમભરપ્રસ્ફુરદ્બ્રધ્નબિમ્બં (પુષ્ટોત્પુષ્ટટ્ટહાસ)
ક્ષુભ્યદ્બ્રહ્માણ્ડ ખણ્ડક્ષુભિતઘુમુઘુમૃદ્ઘૂર્ણનાનાર્ણવૌઘમ્ । (ભાણ્ડક્ષુભિત)
વિભ્યદ્વિભ્રશ્યદભ્રભ્રમણઘણઘણત્ક્રુષ્ટનક્ષત્રલક્ષ
પ્રક્ષોદક્ષોદશોભોદ્ભટભુવનમભિદ્રુહ્યતુ ત્વાં નૃસિંહઃ ॥ ૭॥

ક્ષુભ્નીયાત્ ત્વાં નૃસિંહો ઘહઘહઘહિતિ ક્રોધઘુષ્ટાટ્ટહાસૈ-
    રુત્કૃન્તાત્ ત્વાં નૃસિંહઃ કટકટકટિતિ ક્રુષ્ટદંષ્ટ્રોગ્રદન્તૈઃ ।
ઉદ્ધૂયાત્ ત્વાં નૃસિંહો ઘટઘટઘટિતિ પ્રોદ્ધતોદ્ધત્સટાભિ-
નિર્દહ્યાત્ ત્વાં નૃસિંહો ધુરુધુરુધુરિતિ પ્રસ્ફુરદ્વિષ્ફુલિઙ્ગૈઃ ॥ ૮॥ (ભુરુભુરુભુરિતિ)

સ્તમ્ભં દૈત્યેન્દ્રવક્ષઃસ્થલમપિ યુગપત્ પાટયન્ પાટલાભૈ- (વક્ષસ્તટમપિ)
    રમ્ભોભિઃ સાન્દ્રસિક્તદ્રવવિભવ મયૈસ્તર્પયંસ્તત્પિતૃંશ્ચ ।
જમ્ભારાતીભકુમ્ભસ્થલદલનભયત્રસ્તગીર્વાણસેના-
    ગમ્ભીરસ્તોત્રધારાપરિમલહૃષિતો ભર્જતુ ત્વાં નૃસિંહઃ ॥ ૯॥

અહઙ્કારગ્રન્થેરિતિ દલનમન્ત્રાણિ પઠતાં (ગ્રન્ધરિતિ)
    ત્રિસન્ધ્યં સન્ધ્યાયેત્ ત્રિજગદધિદૈવં નરહરિમ્ ।
અભઙ્ગાનાતઙ્કાનપિ સપદિ જિત્વા નિજરિપૂ-
    નવન્ધ્યૈરૈશ્વર્યૈરભિમતજયશ્રીર્વિજયતે ॥ ૧૦॥

અમુના મનુનાશુ કૃષ્ણલીલાશુકયોગીન્દ્રમુનીન્દ્રગુમ્ભિતેન ।
વહતાં પઠતાં જયં જયશ્રીર્નરસિંહં નવરત્નમણ્ડલેન ॥ ૧૧॥ (ભજતાં વહતાં જયં)

વીરશ્રોત્રરસાયનૈસ્ત્રિભુવનપ્રૌઢૈરમીભિઃ સ્તવૈ-
    ર્વીરશ્રીનરસિંહપાદકમલદ્વન્દ્વં મુહુઃ પ્રીયતામ્ ।
આરબ્ધાભિનવપ્રમોદલહરીભારસ્ફુરન્નિસ્સર-
    નીરન્ધ્રસ્થિતરોમહર્ષભરિતં નૃત્યન્તુ વાગીશ્વરાઃ ॥ ૧૨॥

(નૃસિંહનવરત્નત્તનામકોઽયં સ્તવઃ શ્રીકૃષ્ણલીલાશુકમુનિ-વિરચિત

ઇતિ એતદુપાન્તિમાદ્ “અમુના મનુને” ત્યાદિપદ્યાદવગમ્યતે ।)

ઇતિ શ્રીકૃષ્ણલીલાશુકમુનિવિરચિતઃ નૃસિંહનવરત્નસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Mohan Chettoor

*Nrisimhanavaratna Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*